अथ श्रीमहाकालशनिमृत्युञ्जय स्तोत्रम्

(मृत्युञ्जय, महामृत्युञ्जय एवं विष्णुमृत्युञ्जयस्तोत्रसहित)

Keshav Aryal

॥ अथ मृत्युञ्जय स्तोत्रम् ॥ २

ॐ नमो मृत्युञ्जयाय ॥

॥ नन्दिकेश्वर उवाच — ॥

कैलासस्योत्तरे शृङ्गे शुद्धस्फटिकसन्निभे ॥
तमोगुणविहीने तु जरामृत्युविवर्जिते ॥ १ ॥
सर्वार्थ संपदाधारे सर्वज्ञानकृतालये ॥
कृताञ्जलि पुटो ब्रह्मा ध्यानासीनं सदाशिवम् ॥२
पप्रच्छ प्रणतो भूत्वा जानुभ्यामवनिंगत: ॥
सर्वार्थसम्पदाधार ब्रह्मा लोकपितामह: ॥ ३ ॥

Keshav Aryal

// ब्रह्मोवाच— //

केनोपायेन देवेश चिरायुर्लोमशोऽभवत् ।
तन्मे ब्रूहि महेशान लोकानां हितकाम्यया ॥४॥

// श्रीसदाशिव उवाच— //

Keshav Aryal

शृणु ब्रह्मन् प्रवक्ष्यामि चिरायुर्मुनिसत्तमः ।
सञ्जातः कर्मणा येन व्याधिमृत्युविवर्जितः ॥५॥
तस्मिन्नेकार्णवे घोरे सलिलौघपरिप्लुते ।
कृतान्तभयनाशाय स्तुतो मृत्युञ्जयः शिवः ॥६॥
तस्य संकीर्त्तनान्नित्यं मुनिर्मृत्युविवर्जितः ।

तमेव कीर्तयन् ब्रह्मन् मृत्युं जेतुं न संशयः ॥७॥

लोमश उवाच—

देवाधिदेव देवेश सर्वप्राण भृतांवर ।
प्राणीनामपि नाथस्त्वं मृत्युञ्जय नमोऽस्तु ते ॥८॥
देहिनां जीवभूतोऽसि जीवो जीवस्य कारणम् ।
जगतां रक्षकस्त्वं वै मृत्युञ्जय नमो० ॥९॥
हेमाद्रिशिखराकारे सुधावीचिमनोहर ।
पुण्डरीकपरं ज्योतिर्मृत्युञ्जय नमो० ॥१०॥
ध्यानाधार महाज्ञान सर्वज्ञानैककारण ।

Keshav Aryal

परित्रातासि लोकानां मृत्युञ्जय नमो० ॥११॥
निहता येन कालेन सदेवासुरमानुषाः ।
गन्धर्वाप्सरसश्चैव सिद्धविद्याधरास्तथा ॥१२॥
साध्याश्च वसवो रुद्रास्तथाश्विनिसुतावुभौ ।
मरुतश्च दिशो नागाःस्थावरा जङ्गमास्तथा॥१३॥
जितः सोऽपि त्वया ध्यायन् मृत्युञ्जय० ॥१४॥
ये ध्यायन्ति परां मूर्तिं पूजयन्त्यमरादयः ।
न ते मृत्युवशं यान्ति मृत्युञ्जय नमो० ॥१५॥
त्वमोङ्कारोऽसि वेदानां देवानां च सदाशिवः ।

आधारशक्तिः शक्तीनां मृत्युञ्जय नमो० ॥१६॥
स्थावरे जङ्गमे वापि यावत्तिष्ठति देहगः ।
जीवत्यपत्यलोकोऽयं मृत्युञ्जय नमो० ॥१७॥
सोमसूर्याग्निमध्यस्थव्योमव्यापिन् सदाशिव ।
कालत्रयमहाकाल मृत्युञ्जय नमो० ॥१८॥
प्रबुद्धे चाप्रबुद्धे च त्वमेव सृजसे जगत् ।
सृष्टिरूपेण देवेश मृत्युञ्जय नमो० ॥१९॥
व्योम्नि त्वं व्योमरूपोऽसि तेजः सर्वत्र तेजसि ।
ज्ञानिनां ज्ञानरूपोऽसि मृत्युञ्जय नमो० ॥२०॥

Keshav Aryal

जगज्जीवो जगत्प्राणः स्रष्टा त्वं जगतः प्रभुः ।
कारणं सर्वतीर्थानां मृत्युञ्जय नमो० ॥२१॥
नेता त्वमिन्द्रियाणां च सर्वज्ञानप्रबोधकः ।
सांख्ययोगश्च हंसश्च मृत्युञ्जय नमो० ॥२२॥
रूपातीतः सरूपश्च पिण्डस्थपदमेव च ।
चतुर्युगकलाधार मृत्युञ्जय नमो० ॥२३॥
रेचके वह्निरूपोऽसि सोमरूपोऽसि पूरके ।
कुम्भके शिवरूपोऽसि मृत्युञ्जय नमो० ॥२४॥
क्षयङ्करोऽसि पापानां पुण्यानामपि वर्द्धनम् ।

हेतुस्त्वं श्रेयसां नित्यं मृत्युञ्जय नमो० ॥२५॥
सर्वमायाकलातीत सर्वेन्द्रिय परावर ।
सर्वेन्द्रियकलाधीश मृत्युञ्जय नमो० ॥२६॥
रूपं गन्धो रसः स्पर्शः शब्दः संस्कार एव च ।
त्वत्तः प्रकाश एतेषां मृत्युञ्जय नमो० ॥२७॥
चतुर्विधानां सृष्टीनां हेतुस्त्वं कारणेश्वर ।
भावाभावपरिच्छिन्न मृत्युञ्जय नमो० ॥२८॥
त्वमेको निष्कलो लोके सकलम्भुवनत्रये ।
अतिसूक्ष्मातिरूपस्त्वं मृत्युञ्जय नमो० ॥२९॥

Keshav Aryal

त्वं प्रबोधस्त्वमाधार त्वद्बीजं भुवनत्रयम् ।
सत्वं रजस्तमस्त्वं हि मृत्युञ्जय नमो० ॥३०॥
त्वं सोमस्त्वं दिनेशश्च त्वमात्मा प्रकृतेः परः ।
अष्टत्रिंशत्कलानाथ मृत्युञ्जय नमो० ॥३१॥
सर्वेन्द्रियाणामाधारः सर्वभूतगुणाश्रयः ।
सर्वज्ञानमयानन्त मृत्युञ्जय नमो० ॥३२॥
त्वमात्मा सर्वभूतानां गुणानां त्वमधीश्वरः ।
सर्वानन्दमयाधार मृत्युञ्जय नमो० ॥३३॥
त्वं यज्ञः सर्वयज्ञानां त्वं बुद्धिर्बोधलक्षणा ।

शब्दब्रह्मस्त्वमोङ्कारो मृत्युञ्जय नमो० ॥३४॥
श्रीसदाशिव उवाच–
एवं सङ्कीर्त्तयेद्यस्तु शुचिस्तद्गतमानसः ।
भक्त्या शृणोति यो ब्रह्मन् न स मृत्युवशो भवेत्॥
न च मृत्युभयं तस्य प्राप्तकालं च लङ्घयेत् ।
अपमृत्युभयं तस्य प्रणश्यति न संशयः ॥३६॥
व्याधयो नोपपद्यन्ते नोपसर्गभयं भवेत् ।
प्रत्यासन्नान्तरे काले शतैकावर्तने कृते ॥३७॥
मृत्युर्न जायते तस्य रोगान् मुञ्चति निश्चितम् ।

Keshav Aryal

पञ्चम्यां वा दशम्यां वा पौर्णमास्यामथापि वा ॥
शतमावर्तयेद्यस्तु शतवर्षं स जीवति ।
तेजस्वी बलसम्पन्नो लभते श्रियमुत्तमाम् ॥३९॥
त्रिविधं नाशयेत्पापं मनो-वाक्-कायसम्भवम् ।
अभिचाराणि कर्माणि कर्माण्याथर्वणानि च ।
क्षीयन्ते नात्र सन्देहो दुःस्वप्नश्च विनश्यति ॥४०॥
इदं रहस्यं परमं देवदेवस्य शूलिनः ।
दुःस्वप्ननाशनं पुण्यं सर्वविघ्नविनाशनम् ॥४१॥

इति श्रीशिवब्रह्मसंवादे श्रीमृत्युञ्जयस्तोत्रं सम्पूर्णम् ।

Keshav Aryal

मार्तण्डभैरवतन्त्रोक्तम्—

महाकालशनिमृत्युञ्जयस्तोत्रम्

श्रीगणेशाय नमः ॥ ॐ शनैश्चराय नमः ॥

नीलाद्रिशोभाञ्चितदिव्यमूर्तिः
खड्गी त्रिदण्डी शरचापहस्तः ।
शम्भुर्महाकालशनिः पुरारि-
र्जयत्यशेषासुरनाशकारी ॥१॥

मेरुपृष्ठे समासीनं सामरस्ये स्थितं शिवम् ।
प्रणम्य शिरसा गौरी पृच्छतिस्म जगद्धितम् ॥

Keshav Aryal

पार्वत्युवाच—

भगवन् देवदेवेश भक्तानुग्रहकारक ।
अल्पमृत्युविनाशाय यत्त्वया पूर्वसूचितम् ॥३॥
तदेव त्वं महाबाहो लोकानां हितकारकम् ।
तव मूर्तिप्रभेदस्य महाकालस्य सांप्रतम् ॥४॥
शनिमृत्युञ्जयस्तोत्रं ब्रूहि मे नेत्रजन्मनः ।
अकाल-मृत्यु-हरणमपमृत्यु-निवारणम् ॥५॥
शनिमन्त्रप्रभेदा ये तैर्युक्तं यत्स्तवं शुभम् ।
प्रतिनाम चतुर्थ्यन्तं नमोऽन्तं मनुना युतम् ॥६॥

श्रीश्वर उवाच—

नित्ये प्रियतमे गौरि सर्वलोकहिते रते ।
गुह्याद्गुह्यतमं दिव्यं सर्वलोकोपकारकम् ॥७॥
शनिमृत्युञ्जयस्तोत्रं प्रवक्ष्यामि तवाधुना ।
सर्वमङ्गलमाङ्गल्यं सर्वशत्रुविमर्दनम् ॥८॥
सर्वरोगप्रशमनं सर्वापद्विनिवारणम् ।
शरीरारोग्यकरणमायुर्वृद्धिकरं नृणाम् ॥९॥
यदि भक्तासि मे गौरि गोपनीयं प्रयत्नतः ।
गोपितं सर्वतन्त्रेषु तच्छृणुष्व महेश्वरि ॥१०॥

Keshav Aryal

ॐ अस्य श्रीमहाकालशनिमृत्युञ्जयस्तोत्र-
मन्त्रस्य पिप्पलादऋषिरनुष्टुप्छन्दो महाकाल-
शनिर्देवता शं बीजमायसी शक्तिः कालपुरुषा-
येति कीलकं ममाकालापमृत्युनिवारणार्थे पाठे
विनियोगः ।

ऋषिन्यासं करन्यासं देहन्यासं समाचरेत् ।
महोग्रं मूर्ध्नि विन्यस्य मुखे वैवस्वतं न्यसेत् ।।११।।
गले तु विन्यसेन्मन्दं बाह्वोर्महाग्रहं न्यसेत् ।
हृदि न्यसेन्महाकालं गुह्ये कृशतनुं न्यसेत् ।।१२।।

जान्वोस्तूडुचरं न्यस्य पादयोस्तु शनैश्चरम् ।
एवं न्यासविधिं कृत्वा पश्चात् कालात्मनः शनेः ।।
न्यासं ध्यानं प्रवक्ष्यामि तनौ ध्यात्वा पठेन्नरः ।
कल्पादियुगभेदांश्च कराङ्गन्यासरूपिणः ।।१४।।
कालात्मनो न्यसेद्गात्रे मृत्युञ्जय नमोऽस्तु ते ।
मन्वन्तराणि सर्वाणि महाकाल-स्वरूपिणः।।१५।।
भावयेत्प्रति प्रत्यङ्गे महाकालाय ते नमः ।
भावयेत्प्रभवाद्यब्दान् शीर्षे कालजिते नमः१६।।
नमस्ते नित्यसेव्याय विन्यसेदयने भ्रुवोः ।

Keshav Aryal

सौरये च नमस्तेऽस्तु गण्डयोर्विन्यसेदृतून् १७॥
श्रावणं भावयेदक्ष्णोर्नमः कृष्णनिभाय च।
महोग्राय नमो भाद्रं तथा श्रवणयोर्न्यसेत्॥१८॥
नमो वै दुर्निरीक्ष्याय चाश्विन्यं विन्यसेन् मुखे।
नमो नीलमयूखाय ग्रीवायां कार्तिकं न्यसेत्॥१९॥
मार्गशीर्षं न्यसेद्बाह्वोर्महारौद्राय ते नमः।
ऊर्ध्वलोक-निवासाय पौषं तु हृदये न्यसेत्॥२०॥
नमः कालप्रबोधाय माघं वै चोदरे न्यसेत्।
मन्दगाय नमो मेढ्रे न्यसेद्वै फाल्गुनं तथा॥२१॥

ऊर्वोर्न्यसेच्चैत्रमासं नमः शिवोद्भवाय च।
वैशाखं विन्यसेज्जान्वोर्नमः संवर्त्तकाय च॥२२॥
जङ्घयोर्भावयेज्ज्येष्ठं भैरवाय नमस्तथा।
आषाढं पादयोश्चैव शनये च नमस्तथा॥२३॥
कृष्णपक्षं च क्रूराय नम आपादमस्तके।
न्यसेदाशीर्ष-पादान्ते शुक्लपक्षं ग्रहाय च॥२४॥
न्यसेन्मूलं पादयोश्च ग्रहाय शनये नमः।
नमः सर्वजिते चैव तोयं सर्वाङ्गुलौ न्यसेत्॥२५॥
न्यसेद्गुल्फद्वये विश्वं नमः शुष्कतराय च।

Keshav Aryal

विष्णुभं भावयेज्जङ्घोभयशिष्टतमाय ते ॥२६॥
जानुद्वये धनिष्ठां च न्यसेत् कृष्णरुचे नमः ।
ऊरुद्वये वारुणर्क्षं न्यसेत् कालभृते नमः ॥२७॥
पूर्वभाद्रं न्यसेन् मेढ्रे जटाजूटधराय च ।
पृष्ठ उत्तरभाद्रं च करालाय नमस्तथा ॥२८॥
रेवतीं च न्यसेन्नाभौ नमो मन्दचराय च ।
गर्भदेशे न्यसेद्दस्रं नमः श्यामतराय च ॥२९॥
नमो भोगिस्रजे नित्यं यमं स्तनयुगे न्यसेत् ।
न्यसेत् कृत्तिकां हृदये नमस्तैलप्रियाय च ॥३०॥

रोहिणीं भावयेद्धस्ते नमस्ते खड्गधारिणे ।
मृगं न्यसेद्वामहस्ते त्रिदण्डोल्लसिताय च ॥३१॥
दक्षोर्ध्वं भावयेद्रौद्रं नमो वै बाणधारिणे ।
पुनर्वसुमूर्ध्ववामे नमो वै चापधारिणे ॥३२॥
तिष्यं न्यसेद्दक्षबाहौ नमस्ते हरमन्यवे ।
सार्पं न्यसेद्वामबाहौ चोग्रचापाय ते नमः ॥३३॥
मघां विभावयेत्कण्ठे नमस्ते भस्मधारिणे ।
मुखे न्यसेद्भगर्क्षं च नमः क्रूरग्रहाय च ॥३४॥
भावयेद्दक्षनासायामर्यमाणं च योगिने ।

Keshav Aryal

भावयेद्वामनासायां हस्तर्क्षं धारिणे नमः ॥३५॥
त्वाष्ट्रं न्यसेद्दक्षकर्णे कृसरान्न - प्रियाय ते ।
स्वातीं न्यसेद्वामकर्णे नमो ब्रह्ममयाय ते ॥३६॥
विशाखां च दक्षनेत्रे नमस्ते ज्ञानदृष्टये ।
मैत्रं न्यसेद्वामनेत्रे नमोऽन्धलोचनाय ते ॥३७॥
शाक्रं न्यसेच्च शिरसि नमः संवर्तकाय च ।
विष्कुम्भं भावयेच्छीर्षे सन्धौ कालाय ते नमः ॥
प्रीतियोगं भ्रुवोः सन्धौ महामन्दं नमोऽस्तु ते ।
नेत्रयोः सन्धावायुष्मद्द योगं भीष्माय तेनमः ३९॥

सौभाग्यं भावयेन्नासा-सन्धौ फलाशनाय च ।
शोभनं भावयेत्कर्णे सन्धौ पुण्यात्मने नमः॥४०॥
नमः कृष्णायातिगण्डं हनुसन्धौ विभावयेत् ।
नमो निर्मांसदेहाय सुकर्माणं शिरोधरे ॥४१॥
धृतिं न्यसेद्दक्षबाहौ पृष्ठे छायासुताय च ।
तन्मूलसन्धौ शूलञ्च न्यसेदुग्राय ते नमः ॥४२॥
तत्कूर्परे न्यसेद्गण्डं नित्यानन्दाय ते नमः ।
वृद्धिं तन्मणिबन्धे च कालज्ञाय नमो न्यसेत् ४३॥
ध्रुवं तदङ्गुलीमूल-सन्धौ कृष्णायते नमः ।

Keshav Aryal

व्याघातं भावयेद्वामबाहुपृष्ठे कृशाय च ॥४४॥
हर्षणं तन्मूलसन्धौ भूतसन्तापिने नमः ।
तत्कूर्परे न्यसेद्वज्रं सानन्दाय नमोऽस्तु ते॥४५॥
सिद्धिं तन्मणिबन्धे च न्यसेत् कालाग्नये नमः ।
व्यतीपातं कराग्रेषु न्यसेत्कालकृते नमः ॥४६॥
वरीयांसं दक्षपार्श्व-सन्धौ कालात्मने नमः ।
परिघं भावयेद्वामपार्श्वसन्धौ नमोऽस्तु ते ॥४७॥
न्यसेद्दक्षोरुसन्धौ च शिवं वै कालसाक्षिणे ।
तज्जानौ भावयेत्सिद्धिं महादेहाय ते नमः ॥४८॥

साध्यं न्यसेच्च तद्गुल्फ-सन्धौ घोराय ते नमः ।
न्यसेत्तदङ्गुलीसन्धौ शुभं रौद्राय ते नमः ॥४९॥
न्यसेद्वामोरुसन्धौ च शुक्लं कालविदे नमः ।
ब्रह्मयोगं च तज्जानौ न्यसेत्सद्योगिने नमः ॥५०॥
ऐन्द्रं तद्गुल्फसन्धौ च योगाधीशाय ते नमः ।
न्यसेत्तदङ्गुलीसन्धौ नमो भव्याय वैधृतम् ॥५१॥
चर्मणि बवकरणं भावयेद्यज्वने नमः ।
बालवं भावयेद्रक्ते संहारक नमोऽस्तु ते ॥५२॥
कौलवं भावयेदस्थ्नि नमस्ते सर्वभक्षिणे ।

Keshav Aryal

तैतिलं भावयेन्मांसे आममांसप्रियाय ते ॥५३॥
गरं न्यसेद्वपायां च सर्वग्रासाय ते नमः ।
न्यसेद्वणिजं मज्जायां सर्वान्तक नमोऽस्तु ते ५४॥
वीर्ये विभावयेद्विष्टिं नमो मन्यूग्रतेजसे ।
रुद्रमित्रपितृवसुवारीण्येतांश्च पञ्च च ॥५५॥
मुहूर्तांश्च दक्षपादनखेषु भावयेन् नमः ।
खगेशाय च खस्थाय खेचराय स्वरूपिणे॥५६॥
पुरुहूतशतमखे विश्ववेधोविधूंस्तथा ।
मुहूर्तांश्च वामपादनखेषु भावयेन्नमः ॥५७॥

सत्यव्रताय सत्याय नित्यसत्याय ते नमः ।
सिद्धेश्वर नमस्तुभ्यं योगेश्वर नमोऽस्तु ते ।५८
वह्निनक्तंचरांश्चैव वरुणार्यमयोनिकान् ।
मुहूर्तांश्च दक्षहस्तनखेषु भावयेन् नमः ॥५९॥
लग्नोदयाय दीर्घाय मार्गिणे दक्षदृष्टये ।
वक्राय चातिक्रूराय नमस्ते वामदृष्टये ॥६०॥
वामहस्तनखेष्वन्त्यवर्णेशाय नमोऽस्तु ते ।
गिरिशाहिर्बुध्न्यपूषाजपाद्दस्रांश्च भावयेत्६१॥
राशिभोक्त्रे राशिगाय राशिभ्रमणकारिणे ।

Keshav Aryal

राशिनाथाय राशीनां फलदात्रे नमोऽस्तु ते॥६२॥
यमाग्निचन्द्रादितिजविधातॄंश्च विभावयेत् ।
ऊर्ध्वहस्तदक्षनखेष्वन्त्यकालाय ते नमः ॥६३॥
तुलोच्चस्थाय सौम्याय नक्रकुम्भगृहाय च ।
समीरत्वष्टृजीवांश्च विष्णुतिग्मद्युतीन्न्यसेत्६४॥
ऊर्ध्व-वाम-हस्त-नखेष्वन्य-ग्रह-निवारिणे ।
तुष्टाय च वरिष्ठाय नमो राहुसखाय च ॥६५॥
रविवारं ललाटे च न्यसेद्भीमदृशे नमः ।
सोमवारं न्यसेदास्ये नमोऽमृतप्रियाय च ॥६६॥

भौमवारं न्यसेत्स्वान्ते नमो ब्रह्मस्वरूपिणे ।
मेढ्रे न्यसेत्सौम्यवारं नमो जीवस्वरूपिणे॥६७॥
वृषणे गुरुवारं च नमो मन्त्रस्वरूपिणे ।
भृगुवारं मलद्वारे नमः प्रलयकारिणे ॥६८॥
पादयोः शनिवारं च निर्मांसाय नमोऽस्तु ते ।
न्यसेत्केशेषु घटिकां नमस्ते सूक्ष्मरूपिणे ॥६९॥
[एवं न्यासविधिं कृत्वा ततो ध्यात्वा पठेन्नरः ।
ध्यानं तस्य महेशानि शृणु वक्ष्यामि वन्दिते ॥
ध्यानं→ ध्यायेन्नीलं शनिं घोरं त्रिपुरारिं त्रिदण्डकम् ।

Keshav Aryal

खड्गं हस्ते दधानं तं वामदक्षिणयोः क्रमात् ॥१॥
गृध्रोपरिगतं शुष्कं दीर्घाङ्गं काललोचनम् ।
महाकालं शनिं शम्भुं त्रिपुरारिं त्रिलोचनम् ॥
महोग्रं क्रूरकर्माणं देवदेवं शनैश्चरम् ॥ २॥
एवं ध्यात्वा ततो देवि स्तोत्रमेतत् पठेत् सदा ॥]
ॐ कालरूपिन्नमस्तेऽस्तु सर्वपापप्रणाशकः ।
त्रिपुरस्य वधार्थाय शम्भुजाताय ते नमः ॥७०॥
नमः कालशरीराय कालनुन्नाय ते नमः ।
कालहेतो नमस्तुभ्यं कालनन्दाय वै नमः ॥७१॥

अखण्डदण्डमानाय त्वनाद्यन्ताय वै नमः ।
कालदेवाय कालाय कालकालाय ते नमः ॥७२॥
निमेषादिमहाकल्पकालरूपं च भैरवम् ।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥७३॥
दातारं सर्वभव्यानां भक्तानामभयङ्करम् ।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥७४॥
कर्त्तारं सर्वदुःखानां दुष्टानां भयवर्द्धनम् ।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥७५॥
हर्त्तारं ग्रहजातानां फलानामघकारिणाम् ।

Keshav Aryal

मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥७६॥
सर्वेषामेव भूतानां सुखदं शान्तमव्ययम् ।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥७७॥
कारणं सुखदुःखानां भावाभावस्वरूपिणम् ।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥७८॥
अकाल-मृत्यु-हरणमपमृत्यु-निवारणम् ।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥७९॥
कालरूपेण संसारं भक्षयन्तं महाग्रहम् । ।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥८०॥

दुर्निरीक्ष्यं स्थूलरोमं भीषणं दीर्घलोचनम् ।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥८१॥
ग्रहाणां ग्रहभूतं च सर्वग्रहनिवारणम् ।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥८२॥
कालस्य वशगाः सर्वे न कालः कस्यचिद्वशः ।
तस्मात्त्वां कालपुरुषं प्रणतोऽस्मि शनैश्चरम् ८३॥
कालादेव जगत्सर्वं काल एव विलीयते ।
कालरूपं स्वयं शम्भुः कालात्मा ग्रहदेवता॥८४॥
चण्डीशो रुद्रडाकिन्याक्रान्तश्चण्डीश उच्यते ।

Keshav Aryal

विद्युदाकलितो नद्यां समारूढो रसाधिपः॥८५॥
चण्डीशः शुकसंयुक्तो जिह्वया ललितः पुनः।
क्षतजस्तामसी शोभी स्थिरात्मा विद्युता युतः॥८६
नमोऽन्तो मनुरित्येष शनितुष्टिकरः शिवे।
आद्यन्तेऽष्टोत्तरशतं मनुमेनं जपेन्नरः॥८७॥
यः पठेच्छृणुयाद्वापि ध्यात्वा सम्पूज्य भक्तितः।
तस्य मृत्योर्भयं नैव शतवर्षावधि प्रिये॥८८॥
ज्वराः सर्वे विनश्यन्ति दद्रुविस्फोटकच्छुकाः।
दिवा सौरिं स्मरेत् रात्रौ महाकालं यजन् पठेत्॥

जन्मर्क्षे च यदासौरिर्जपेदेतत्सहस्रकम्।
वेधगे वामवेधे वा जपेदर्द्धसहस्रकम्॥९०॥
द्वितीये द्वादशे मन्दे तनौ वा चाष्टमेऽपि वा।
तत्तद्राशौ भवेद्यावत् पठेत्तावद्दिनावधि॥९१॥
चतुर्थे दशमे वापि सप्तमे नवपञ्चमे।
गोचरे जन्मलग्नेशे दशास्वन्तर्दशासु च॥९२॥
गुरुलाघवज्ञानेन पठेदावृत्तिसंख्यया।
शतमेकं त्रयं वाथ शतयुग्मं कदाचन॥९३॥
आपदस्तस्य नश्यन्ति पापानि च जयं भवेत्।

Keshav Aryal

महाकालालये पीठे ह्यथवा जलसन्निधौ ॥९४॥
पुण्यक्षेत्रेऽश्वत्थमूले तैलकुम्भाग्रतो गृहे ।
नियमेनैकभक्तेन ब्रह्मचर्येण मौनिना ॥९५॥
श्रोतव्यं पठितव्यं च साधकानां सुखावहम् ।
परं स्वस्त्ययनं पुण्यं स्तोत्रं मृत्युञ्जयाभिधम् ९६
कालक्रमेण कथितं न्यासक्रमसमन्वितम् ।
प्रातःकाले शुचिर्भूत्वा पूजायां च निशामुखे९७
पठतां नैव दुष्टेभ्यो व्याघ्रसर्पादितो भयम् ।
नाग्नितो न जलाद्वायोर्देशे देशान्तरेऽथवा ॥९८॥

नाकाले मरणं तेषां नापमृत्युभयं भवेत् ।
आयुर्वर्षशतं साग्रं भवन्ति चिरजीविनः ॥९९॥
नातः परतरं स्तोत्रं शनितुष्टिकरं महत् ।
शान्तिकं शीघ्रफलदं स्तोत्रमेतन्मयोदितम् १००
तस्मात् सर्वप्रयत्नेन यदीच्छेदात्मनो हितम् ।
कथनीयं महादेवी नैवाभक्तस्य कस्यचित् १०१॥

इति श्रीमार्तण्डभैरवतन्त्रे महाकालशनिमृत्युञ्जयस्तोत्रं सम्पूर्णम् ।

Keshav Aryal

महामृत्युञ्जयस्तोत्रम्

श्रीगणेशाय नमः। ॐ अस्य श्रीमहामृत्युञ्जयस्तोत्रमन्त्रस्य श्रीमार्कण्डेय ऋषिः। अनुष्टुप् छन्दः। श्रीमृत्युञ्जयो देवता। गौरी शक्तिः मम सर्वारिष्टसमस्तापमृत्युशान्त्यर्थं सकलैश्वर्यप्राप्त्यर्थं च जपे विनियोगः। अथ ध्यानम्—

चन्द्रार्काग्निविलोचनं स्मितमुखं
पद्मद्वयान्तस्थितं

Keshav Aryal

मुद्रापाशमृगाक्षसूत्रविलसत्
पाणिं हिमांशुप्रभम्।
कोटीन्दुप्रगलत्सुधाप्लुततनुं
हारादिभूषोज्ज्वलं
कान्तं विश्वविमोहनं पशुपतिं
मृत्युञ्जयं भावयेत्॥

ॐ रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम्।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥१॥
नीलकण्ठं कालमूर्तिं कालज्ञं कालनाशनम्।

Keshav Aryal

नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥२॥
नीलकण्ठं विरूपाक्षं निर्मलं निलयप्रभम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥३॥
वामदेवं महादेवं लोकनाथं जगद्गुरुम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥४॥
देवदेवं जगन्नाथं देवेशं वृषभध्वजम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥५॥
गङ्गाधरं महादेवं सर्वाभरणभूषितम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥६॥

अनाथं परमानन्दं कैवल्यपददायिनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥७॥
स्वर्गापवर्गदातारं सृष्टिस्थितिविनाशकम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥८॥
उत्पत्तिस्थितिसंहार-कर्त्तारमीश्वरं गुरुम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥९॥
मार्कण्डेयकृतं स्तोत्रं यः पठेच्छिवसन्निधौ ।
तस्य मृत्युभयं नास्ति नाग्निचौरभयं क्वचित् १०
शतावर्तं प्रकर्तव्यं संकटे कष्टनाशनम् ।

शुचिर्भूत्वा पठेत्स्तोत्रं सर्वसिद्धिप्रदायकम्॥११॥
मृत्युञ्जयं महादेव त्राहि मां शरणागतम् ।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥१२॥
तावतस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड ।
इति विज्ञाप्य देवेशं त्र्यम्बकाख्यमनुं जपेत् ॥
नमः शिवाय साम्बाय हरये परमात्मने ।
प्रणतक्लेशनाशाय योगिनां पतये नमः ॥१४॥

शताङ्गायुर्मन्त्रः—ॐ ह्रीं श्रीं।ह्रीं ह्रौं ह्रें ह्रः हन हन दह दह पच पच गृहाण गृहाण मारय

मारय मर्दय मर्दय महामहाभैरव भैरवरूपेण धुनुय धुनुय कम्पय कम्पय विघ्नय विघ्नय विश्वेश्वर क्षोभय क्षोभय कटु कटु मोहय मोहय हुंफट् स्वाहा ।

इति मन्त्रमात्रेण लब्धाभीष्टो भवति ।

इति श्रीमार्कण्डेयपुराणे मार्कण्डेयकृतं महामृत्युञ्जयस्तोत्रम् ।

Keshav Aryal

विष्णुमृत्युञ्जयस्तोत्रम्

ॐ नमो भगवते मृत्युञ्जयाय।

ततो विष्ण्वर्पितमना मार्कण्डेयो महामतिः।
तुष्टाव प्रणतो भूत्वा देवदेवं जनार्दनम् ॥१॥
विष्णुनैवोपदिष्टं तु स्तोत्रं कर्णौ महामनाः।
सम्भावितेन मनसा तेन तुष्टाव माधवम् ॥२॥

ॐ नमो भगवते वासुदेवाय—

नारायणं सहस्राक्षं पद्मनाभं पुरातनम्।

प्रणतोऽस्मि हृषीकेशं किं मे मृत्युः करिष्यति।३॥
गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम्।
केशवं च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति४॥
वाराहं वामनं विष्णुं नारसिंहं जनार्दनम्।
माधवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥५॥
पुरुषं पुष्करं पुण्यं क्षेमबीजं जगत्पतिम्।
लोकनाथं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ६॥
भूतात्मानं महात्मानं जगद्योनिमयोनिजम्।
विश्वरूपं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति७॥

Keshav Aryal

सहस्रशिरसं देवं व्यक्ताव्यक्तं सनातनम् ।
महायोगं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥८॥
इत्युदीरितमाकर्ण्य स्तोत्रं तस्य महात्मनः ।
अपयातस्ततो मृत्युर्विष्णुदूतैश्च पीडितः ॥९॥
इति तेन जितो मृत्युर्मार्कण्डेयेन धीमता ।
प्रसन्ने पुण्डरीकाक्षे नृसिंहे नास्ति दुर्लभम् ॥१०॥
मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह ॥११॥
य इदं पठते भक्त्या त्रिकालं नियतः शुचिः ।
नाकाले तस्य मृत्युः स्यान्नरस्याच्युतचेतसः ॥१२॥

Keshav Aryal

हृत्पद्ममध्ये पुरुषं पुराणं
नारायणं शाश्वतमादिदेवम् ।
सञ्चिन्त्य सूर्यादपि राजमानं
मृत्युं स योगी जितवांस्तथैव ॥१३॥

* इति श्रीनरसिंहपुराणे मार्कण्डेयकृत वि.णुमृत्युञ्जयस्तोत्रम् । *

Keshav Aryal

४८

शिवपञ्चाक्षरस्तोत्रम्

नागेन्द्रहाराय त्रिलोचनाय
भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय
तस्मै 'न'काराय नमः शिवाय ॥

मन्दाकिनीसलिलचन्दनचर्चिताय
नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय
तस्मै 'म'काराय नमः शिवाय ॥

शिवाय गौरीवदनाब्जवृन्द-
सूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय
तस्मै 'शि'काराय नमः शिवाय ॥

वसिष्ठकुम्भोद्भवगौतमार्य-
मुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय
तस्मै 'व'काराय नमः शिवाय ॥

य(क्ष)ज्ञस्वरूपाय जटाधराय
पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय
तस्मै 'य'काराय नमः शिवाय ॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसंनिधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

॥ इति ॥

*****

Keshav Aryal

॥ शनिस्तोत्रम् ॥

नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसम्भूतं तं नमामि शनैश्चरम् ॥ १ ॥
नमस्ते कोणसंस्थाय पिङ्गलाय नमोस्तुते ।
नमस्ते विभुरूपाय कृष्णाय च नमोस्तुते ॥ २ ॥
नमस्ते रौद्रदेहाय नमस्ते चान्तकाय च ।
नमस्ते यमसंज्ञाय नमस्ते सौरये विभो ॥ ३ ॥
नमस्ते मन्दसंज्ञाय शनैश्चर नमोस्तुते ।
प्रसाद कुरु देवेश दीनस्य प्रणतस्य च ॥ ४ ॥

॥ इति शनि स्तोत्रम् ॥

Keshav Aryal

॥ महामृत्युंजय मंत्र जाप ॥ (वैदिक)

प्रार्थना :- मृत्युञ्जय महादेव त्राहि मां शरणागतम् ।
जन्म मृत्यु जरा व्याधि पिडीतं कर्मबंधनैः ॥

मंत्र :- ॐ ह्रौं जूं सः । ॐ भूर्भुवः स्वः ॥

ॐ त्र्यम्बकं यजामहे सुगन्धीं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् ॥ ॐ
स्वः भुवः भूः ॐ । सः जूं ह्रौं ॐ ॥

जपसंख्या - २८००० * दान - शनिकोदान ।

॥ शिव प्रणाम मन्त्रः ॥

ॐ विश्वेश्वराय नरकार्णवतारणाय
कर्णामृताय शशिशेखर भूषणाय ।
कर्पूरकुन्द धवलाय जटाधराय
दारिद्र्य-दुखदहनाय नमः शिवाय ॥१॥

नमः शिवाय शान्ताय करणत्रय हेतवे ।
निवेदयामि-चात्मानं गतिस्त्वं परमेश्वर ॥२॥

॥ ॐ नमः शिवाय ॥

Keshav Aryal